# bRihatpArAsharahorAshAstramh 81-90

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૮૧-૯૦

## Document Information

Text title : bRihatpArAsharahorAshAstram.h 81-90

File name : par8190.itx

Category : jyotisha, sociology_astrology, bRihatpArAshara

Location : doc_z_misc_sociology_astrology

Transliterated by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Proofread by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Latest update : November 1, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# bRihatpArAsharahorAshAstramh 81-90

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૮૧-૯૦

અથ અંગલક્ષણફલાધ્યાયઃ ॥ ૮૧॥

બહુધા ભવ્તા પ્રોક્તં જન્મકાલાત્ શુભાશુભમ્ ।
શ્રોતુમિચ્છામિ નારોણામઙ્ગચિહ્નૈઃ ફલ મુને ॥ ૧॥

શૃણુ વિપ્ર પ્રવક્ષ્યામિ નારીણામઙ્ગલક્ષણમ્ ।
ફલં યથાઽહ પાર્વત્યૈ ભગવાન્ શઙ્કરસ્તથા ॥ ૨॥

સ્નિગ્ધં પાદતલં સ્ત્રીણાં મૃદુલં માંસલં સમમ્ ।
રક્તમસ્વેદમુષ્ણં ચ બહુભોગપ્રદાયકમ્ ॥ ૩॥

વિવર્ણં પુરુષં રૂક્ષં ખણ્ડિતં વિષમં તથા ।
સૂર્પાકારઞ્ચ શુષ્કં ચ દુઃખદૌર્ભાગ્યદાયકમ્ ॥ ૪॥

શઙ્ખસ્વસ્તિકચક્રાઽબ્જધ્વજમીનાઽતપત્રવત્ ।
યસ્યાઃ પાદતલે ચિહ્નં સા જ્ઞેયા ક્ષિતિપાઙ્ગના ॥ ૫॥

ભવેત્ સમસ્તભોગાય તથા દીર્ઘોર્ધ્વરેખિકા ।
રેખાઃ સર્પાઽખુકાકાભા દુઃખદારિદ્ર્યસૂચિકાઃ ॥ ૬॥

રક્તાઃ સમુન્નતાઃ સ્નિગ્ધા વૃત્તાઃ પાદનખાઃ શુભાઃ ।
સ્ફુટિતાઃ કૃષ્ણવર્ણાશ્ચ જ્ઞેયા અશુભસૂચકાઃ ॥ ૭॥

ઉન્નતો માંસલોઽઙ્ગુષ્ઠો વર્તુલોઽતુલભોગદઃ ।
વક્રો હ્રસ્વશ્ચ ચિપિટો દુઃખદારિદ્ર્યસૂચકઃ ॥ ૮॥

મૃદવોઽઙ્ગુલયઃ શસ્તા ઘના વૃત્તાશ્ચ માંસલાઃ ।
દીર્ઘાઙ્ગુલીભિઃ કુલટા કૃશાભિર્ધનવર્જિતા ॥ ૯॥

ભવેદ્ધ્રસ્વાભિરલ્પાયુર્વિષમાભિશ્ચ કુટ્ટની ।
ચિપટાભિર્ભવેદ્દાસી વિરલાભશ્ચ નિર્ધના ॥ ૧૦॥

યસ્ય મિથઃ સમારૂઢાઃ પાદાઙ્ગુલ્યો ભવન્તિ હિ ।
બહુનપિ પતીન્ હિત્વા પરપ્રેષ્યા ચ સા ભવેત્ ॥ ૧૧॥

યસ્યા પથિ ચલન્ત્યાશ્ચ રજો ભૂમેઃ સમુચ્છલેત્ ।
સા પાંસુલી બહ્વેન્નારી કુલત્રયવિઘાતિની ॥ ૧૨॥

યસ્યાઃ કનિષ્ઠિકા ભૂમિં ગચ્છન્ત્યા ન પરિસ્પૃશેત્ ।
સા હિ પૂર્વપતિં હત્વા દ્વિતીયં કુરુતે પતિમ્ ॥ ૧૩॥

મધ્યમાઽનામિકા ચાપિ યસ્યા ભૂમિં ન સંસ્પૃશેત્ ।
પતિહીના ચ સા નારી વિજ્ઞેયા દ્વિજસત્તમ ॥ ૧૪॥

પ્રદેશિની ભવેદ્યસ્યા અંગુષ્ઠાદ્વ્યતિરેકિણી ।
કન્યૈવ દૂષિતા સા સ્યાત્ કુલટા ચ તદગ્રતઃ ॥ ૧૫॥

ઉન્નતં પાદપૃષ્ઠં ચેત્ તદા રાજ્ઞી ભવેદ્ધ્રુવમ્ ।
અસ્વેદમશિરાઢ્યઞ્ચ માંસલં મસૃણં મૃદુ ॥ ૧૬॥

અન્યથા ધનહીના ચ શિરાલં ચેત્તદાઽધ્વગા ।
રોમાઢ્યં ચેદ્ ભવેદ્દાસી નિર્માસં યદિ દુર્ભગા ॥ ૧૭॥

સુભગા સમપાર્ષ્ણિઃ સ્ત્રી પૃથુપાર્ષ્ણિશ્ચ દુર્ભગા ।
કુલટોન્નતપાર્ષ્ણિશ્ચ દીર્ઘપાર્ષ્ણિશ્ચ દુઃખિતા ॥ ૧૮॥

અરોમે ચ સમે સ્નિગ્ધે યસ્યા જંઘ સુવર્તુલે ।
વિસિરે ચ સુરમ્યે સા રાજપત્ની ભવેદ્ધ્રુવમ્ ॥ ૧૯॥

વર્તુલં માંસલં સ્નિગ્ધં જાનુયુગ્મં શુભપ્રદમ્ ।
નિર્માસં સ્વૈરચારિણ્યા નિર્ધનાયાશ્ચ વિશ્લથમ્ ॥ ૨૦॥

ઘનૌ કરિકરાકારૌ વર્તુલૌ મૃદુલૌ શુભૌ ।
યસ્યા ઊરૂ શિરાહીનૌ સા રાજ્ઞી ભવતિ ધ્રુવમ્ ॥ ૨૧॥

ચિપિટૌ રોમશૌ યસ્યા વિધવા દુર્ભગા ચ સા ।
ચતુર્ભિર્વિશતિયુતૈરંગુલૈશ્ચ સમા કટિઃ ।
સમુન્નતનિતમ્બાઢ્યા પ્રશસ્તા સ્યાત્ મૃગીદૃશામ્ ॥ ૨૨॥

વિનતા ચિપટા દીર્ઘા નિર્માંસા સંકટા કટિઃ ।
હ્રસ્વા રોમૈઃ સમાયુક્તા દુઃખવૈધવ્યસૂચિકા ॥ ૨૩॥

નતિમ્બઃ શુભદઃ સ્ત્રીણામુન્નતો માંસલઃ પૃથુઃ ।

સુખસૌભાગ્યદઃ પ્રોક્તો જ્ઞેયો દુઃખપ્રદોઽન્યથા ॥ ૨૪॥

સ્ત્રીણાં ગૂઢમણિસ્તુઙ્ગો રક્તાભો મૃદુરોમકઃ ।
ભગઃ કમઠપૃષ્ઠાભઃ શુભોઽશ્વત્થગલાકૃતિઃ ॥ ૨૫॥

કુરઙ્ગખુરરૂપો યશ્ચુલ્લિકોદરસંનિભિઃ ।
રોમશો દૃશ્યનાસશ્ચ વિવૃત્તાસ્યોઽશુભપ્રદઃ ॥ ૨૬॥

વામોન્નતસ્તુ કન્યાજઃ પુત્રોજો દક્ષિણોન્નતઃ ।
શઙ્ખાવર્તો ભગો યસ્યાઃ સા વિગર્ભાઙ્ગના મતા ॥ ૨૭॥

મૃદ્વી વસ્તિઃ પ્રશસ્તા સ્યાદ્ વિપુલાલ્પસમુન્નતા ।
રોમાઢ્યા ચ શિરાલા ચ રેખાઙ્કા ન શુભપ્રદા ॥ ૨૮॥

ગમ્ભીરા દક્ષિણાવર્તા નાભિઃ સર્વસુખપ્રદા ।
વ્યક્તગ્રન્થિઃ સમુત્તાના વામાવર્તા ન શોભના ॥ ૨૯॥

પૃથુકુક્ષિઃ શુભા નારી સૂતે સા ચ બહૂન્ સુતાન્ ।
ભૂપતિં જનયેત્ પુત્રં મણ્ડૂકાભેન કુક્ષિણા ॥ ૩૦॥

ઉન્નતેન વલીભાજા સાવર્તેન ચ કુક્ષિણા ।
વન્ધ્યા સંન્યાસિની દાસી જાયતે ક્રમદોઽબલા ॥ ૩૧॥

સમે સમાંશે મૃદુલે પાર્શ્વે સ્ત્રીણાં શુભપ્રદે ।
ઉન્નતે રોમસંયુક્તે શિરાલે ચાઽશુભપ્રદે ॥ ૩૨॥

નિર્લોભં હૃદયં સ્ત્રીણાં સમે સર્વસુખપ્રદમ્ ।
વિસ્તીર્ણં ચ સલોમં ચ વિજ્ઞેયમશુભપ્રદમ્ ॥ ૩૩॥

સમૌ પીનૌ ઘનૌ વૃત્તૌ દૃઢૌ શસ્તૌ પયોધ્રૌ ।
સ્થૂલાગ્રૌ વિરલૌ શુષ્કૌ સ્ત્રીણાં નૈવ શુભપ્રદૌ ॥ ૩૪॥

દક્ષિણોન્નતવક્ષોજા નારી પુત્રવતી મતા ।
વામોન્નતસ્તની કન્યાપ્રજા પ્રોક્તા પુરાતનૈઃ ॥ ૩૫॥

નારીણાં ચૂચુકે શસ્તે શ્યામવર્ણે સુવર્તુલે ।
અન્તર્ભગ્ને ચ દીર્ઘે ચ કૃશે ચાપિ ન શોભને ॥ ૩૬॥

સ્ત્રીણાં સ્કન્ધૌ સમૌ પુષ્ટૌ ગૂઢસન્ધી શુભપ્રદૌ ।
રોમાઢ્યાવુન્નતૌ વક્રૌ નિર્માસાવશુભૌ સ્મૃતૌ ॥ ૩૭॥

સુસૂક્ષ્મરોમે નારીણાં પુષ્ટે સ્નિગ્ધે શુભપ્રદે ।
કક્ષે શિરાલે ગમ્ભીરે ન શુભે સ્વેદમેદુરે ॥ ૩૮॥

ગૂઢાસ્થી કોમલગ્રન્થી વિશિરૌ ચ બિરોમકૌ ।
સરલૌ સુવર્તુલૌ ચૈવ ભુજૌ શસ્તૌ મૃગીદૃશામ્ ॥ ૩૯॥

નિર્માંસૌ સ્થૂલરોમાણૌ હ્રસ્વૌ ચૈવ શિરાતતૌ ।
વક્રૌ ભુજૌ ચ નારીણાં ક્લેશાય પરિકીર્તિતૌ ॥ ૪૦॥

સરોજમુકુલાકારો કરાંગુષ્ઠૌ મૃગીદૃશામ્ ।
સર્વસૌખ્યપ્રદૌ પ્રોક્તૌ કૃશૌ વક્રૌ ચ દુઃખદૌ ॥ ૪૧॥

સ્ત્રીણાં કરતલં રક્તં મધ્યોન્નતમરન્ધ્રકમ્ ।
મૃદુલં ચાલ્પરેખાઢ્યં જ્ઞેયં સર્વસુખપ્રદમ્ ॥ ૪૨॥

વિધવા બહુરેખેણ રેખાહીનેન નિર્ધને ।
ભિક્ષુકા ચ શિરોઢ્યેન નારી કરતલેન હિ ॥ ૪૩॥

પાણિપૃષ્ઠં શુભં સ્ત્રીણાં પુષ્ટં મૃદુવિરોમકમ્ ।
શિરાલં રોમશં નિમ્નાં દુખદારિદ્યસૂચકમ્ ॥ ૪૪॥

યસ્યાઃ કરતલે રેખા વ્યક્તા રક્તા ચ વર્તુલા ।
સ્નિગ્ધા પૂર્ણા ચ ગમ્ભીરા સા સર્વસુખભાગિની ॥ ૪૫॥

મત્સ્યેન સુભગા જ્ઞેયા સ્વસ્તિકેન ધનાન્વિતા ।
રાજપત્ની સરોજેન જનની પૃથિવીપતેઃ ॥ ૪૬॥

સાર્વભૌમપ્રિયા પાણૌ નદ્યાવર્તે પ્રદક્ષિણે ।
શઙ્ખાતપત્રકમઠૈર્ભૂપસ્ય જનની ભવેત્ ॥ ૪૭॥

રેખા તુલાકૃતિઃ પાણૌ યસ્યાઃ સા હિ બણિગ્વધૂઃ ।
ગજવાજિવૃષાભા વા કરે વામે મૃગીદૃશઃ ॥ ૪૮॥

રેખા પ્રસાદવજ્રાભા સૂતે તીર્થકરં સુતમ્ ।
કૃષીવલસ્ય પત્ની સ્યાચ્છકટેન યુગેન વા ॥ ૪૯॥

ચામરાઙ્કુશચાપૈશ્ચ રાજપત્ની પતિવ્રતા ।
ત્રિશૂલાડસિગદાશક્તિદુન્દુભ્યાકૃતિરેખયા ॥ ૫૦॥

અઙ્ગુષ્ઠમૂલાન્નિર્ગત્યા રેખા યાતિ કનિષ્ઠિકામ્ ।
સા નારિ પતિહન્ત્રી સ્યાદ્ દૂરતસ્તાં પરિત્યજેત્ ॥ ૫૧॥

કાકમણ્ડૂકજમ્બૂકવૃકવૃશ્ચિકભોગિનઃ ।
રાસભોષ્ટ્રવિડાલાભા રેખા દુઃખપ્રદાઃ સ્ત્રિયાઃ ॥ ૫૨॥

મૃદુલાશ્ચ સુપર્વાણો દીર્ઘા વૃત્તાઃ ક્રમાત્ કૃશાઃ ।
અરોમકાઃ શુભાઃ સ્ત્રીણામઙ્ગુલ્યઃ પરિકીર્તિતાઃ ॥ ૫૩॥

અતિહ્રસ્વાઃ કૃશા વક્રા વિરલા રોમસંયુતાઃ ।
બહુપર્વયુતા વાઽપિ પર્વહીનાશ્ચ દુઃખદાઃ ॥ ૫૪॥

રક્તવર્ણા નખાસ્તુઙ્ગા સશિખાશ્ચ શુભપ્રદાઃ ।
નિમ્ના વિવર્ણા પીતા વા પુષ્પિતા દુઃખદાયકાઃ ॥ ૫૫॥

અન્તર્નિમગ્નવંશાસ્થિ પૃષ્ઠં સ્યાન્માંસલં શુભમ્ ।
સશિરં રોમયુક્તં વા વક્રં ચાઽશુભદાયકમ્ ॥ ૫૬॥

સ્ત્રીણાં કણ્ઠસ્ત્રિરેખાઙ્કુસ્ત્વવ્યક્તાસ્થિશ્ચ વર્તુલઃ ।
માંસલો મૃદુલૈશ્ચૈવ પ્રશસ્તફલદાયકાઃ ॥ ૫૭॥

સ્થૂલગ્રીવઃ ચ વિધવા વક્રગ્રીવ ચ કિઙ્કુરી ।
બન્ધ્યા ચ ચિપિટગ્રીવા લઘુગ્રીવા ચ નિઃસુતા ॥ ૫૮॥

શ્રેષ્ઠા કૃકાટિકા ઋજ્વી સમાંસા ચ સમુન્નતા ।
શુષ્કા શિરાલા રોમાઢ્યા વિશાલા કુટિલાઽસુભા ॥ ૫૯॥

અરુણં મૃદુલં પુષ્ટં પ્રશસ્તં ચિબુકં સ્ત્રિયાઃ ।
આયતં રોમશં સ્થૂલં દ્વિધાભક્તમશોભનમ્ ॥ ૬૦॥

કપોલાવુન્નતૌ સ્ત્રીણાં પીનૌ વૃત્તૌ શુભપ્રદૌ ।
રોમશૌ પુરુષૌ નિમ્નૌ નિર્માંસૌ ચાઽશુભપ્રદૌ ॥ ૬૧॥

સ્ત્રીણાં મુખં સમં પૃષ્ઠં વર્તુલં ચ સુગન્ધિમત્ ।
સુસ્નિગ્ધં ચ મનોહારિ સુખસૌભાગ્યસૂચકમ્ ॥ ૬૨॥

વર્તુલઃ પાટલઃ સ્નિગ્ધારેખાભૂષિતમધ્યભૂઃ ।
મનોહરોઽધરો યસ્યાઃ સા ભવેદ્ રાજવલ્લભા ॥ ૬૩॥

નિર્માંસઃ સ્ફુટિતો લમ્બો રૂક્ષો વા શ્યામવર્ણકઃ ।
સ્થૂલોઽધરશ્ચ નારીણાં વૈધવ્યક્લેશસૂચકઃ ॥ ૬૪॥

રક્તોત્પલનિભઃ સ્નિગ્ધ ઉત્તરોષ્ઠો મૃગીદૃશામ્ ।

કિઞ્ચિન્મધ્યૌન્નતોઽરોમા સુખસૌભાગ્યગો ભવેત્ ॥ ૬૫॥

સ્નિગ્ધાગુગ્ધનિભાઃ સ્ત્રીણાં દ્વાત્રિંશદ્દશનાઃ શુભાઃ ।
અધસ્તાદુપરિષ્ટાચ્ચ સમાઃ સ્તોકસમુન્નતાઃ ॥ ૬૬॥

અધસ્તાદધિકાઃ પીતાઃ શ્યામા દીર્ઘા દ્વિપઙ્ક્તયઃ ।
વિકટા વિરલાશ્ચાપિ દશના ન શુભાઃ સ્મૃતાઃ ॥ ૬૭॥

શોણા મૃદ્વી શુભા જિહ્વા સ્ત્રીણામતુલભોગદા ।
દુઃખદા મધ્યસઙ્કીર્ણા પુરોભાગેઽતિવિસ્તરા ॥ ૬૮॥

સિતયા મરણં તોયે શ્યામયા કલહપ્રિયા ।
માંસલયા ધનૈર્હીના લમ્બયાઽભક્ષ્યભક્ષિણી ॥ ૬૯॥

પ્રમાદસહિતા નારી જિહ્વયા ચ વિશાલયા ।
સુસ્નિગ્ધં પાટલં સ્ત્રીણાં કોમલં તાલુશોભનમ્ ॥ ૭૦॥

શ્વેતે તાલુનિ વૈધવ્યં પીતે પ્રવ્રજિતા ભવેત્ ।
કૃષ્ણે સન્તતિહીના સ્યાદ્રૂક્ષે ભૂરિકુટુમ્બિની ॥ ૭૧॥

અલક્ષિતરદં સ્ત્રીણાં કિઞ્ચિત્ફુલ્લકપોલકમ્ ।
સ્મિતં શુભપ્રદં જ્ઞેયમન્યથા ત્વશુભપ્રદમ્ ॥ ૭૨॥

સમવૃત્તપુટા નાસા લઘુચ્છિદ્રા શુભપ્રદા ।
સ્થૂલાગ્રા મધ્યનિમ્ના વા ન પ્રશસ્તા મૃગીદૃશામ્ ॥ ૭૩॥

રક્તાગ્રાઽકુઞ્ચિતાગ્રા વા નાસા વૈધવ્યકારિણી ।
દાસી સા ચિપિટા યસ્યા હ્રસ્વા દીર્ઘા કલિપ્રિયા ॥ ૭૪॥

શુભે વિલોચને સ્ત્રીણાં રક્તાન્તે કૃષ્ણતારકે ।
ગોક્ષીરવર્ણે વિશદે સુસ્નિગ્ધે કૃષ્ણપક્ષ્મિણી ॥ ૭૫॥

ઉન્નતાક્ષી ન દીર્ઘાયુર્વૃત્તાક્ષી કુલટા ભવેત્ ।
રમણી મધુપિઙ્ગાક્ષી સુખસૌભાગ્યભાગિની ॥ ૭૬॥

પુંશ્ચલી વામકાણાક્ષી વન્ધ્યા દક્ષિણકાણિકા ।
પારાવતાક્ષી દુઃશીલા ગજાક્ષી નૈવ શોભના ॥ ૭૭॥

મૃદુભિઃ પક્ષ્મભિઃ કૃષ્ણૈર્ઘનૈઃ સૂક્ષ્મૈઃ સુભાગ્યયુક્ ।
વિરલૈઃ કપિલૈઃ સ્થૂલૈર્ભામિની દુખભાગિની ॥ ૭૮॥

વર્તુલૌ કાર્મુકાકારૌ સ્નિગ્ધે કૃષ્ણે અસંહતે ।
સુભ્રુવૌ મૃદુરોમાણૌ સુભ્રુવાં સુખકીર્તિદૌ ॥ ૭૯॥

કર્ણૌ દીર્ઘૌ શુભાવર્તૌ સુતસૌભાગ્યદાયકૌ ।
શષ્કુલીરહિતૌ નિન્દ્યૌ શિરાલૌ કુટિલૌ કૃશૌ ॥ ૮૦॥

શિરાવિરહિતો ભાલઃ નિર્લોમાઽર્ધશશિપ્રભઃ ।
અનિમ્નસ્ત્ર્યઙ્ગુલસ્ત્રોણાં સુતસૌભાગ્યસૌખ્યદઃ ॥ ૮૧॥

સ્પષ્ટસ્વસ્તિકચિહ્નશ્ચ ભાલો રાજ્યપ્રદઃ સ્ત્રિયાઃ ।
પ્રલમ્બો રોમશશ્ચૈવ પ્રાંશુશ્ચ દુઃખદઃ સ્મૃતઃ ॥ ૮૨॥

ઉન્નતો ગજકુમ્ભાભો વૃત્તો મૂર્ધા શુભઃ સ્ત્રિયાઃ ।
સ્થૂલો ગીર્ઘોઽથવા વક્રો દુઃખદૌર્ભાગ્યસૂચકઃ ॥ ૮૩॥

કુન્તલાઃ કોમલાઃ કૃષ્ણાઃ સૂક્ષ્મા દીર્ઘશ્ચ શોભના ।
પિઙ્ગલાઃ પુરુષા રૂક્ષા વિરલા લઘવોઽશુભાઃ ॥ ૮૪॥

પિઙ્ગલા ગૌરવર્ણાયા શ્યામાયાઃ શ્યામલાઃ શુભાઃ ।
નારીલક્ષણતશ્ચૈવં નરાણામપિ ચિન્તયેત્ ॥ ૮૫॥

## અથ તિલાદિલાંછનફલાધ્યાયઃ ॥ ૮૨॥

અથાઽહં દેહજાતાનાં લાંછનાનાં ફલં બ્રુવે ।
આવર્તાનાં તિલાનાં ચ મશકાનાં વિશેષતઃ ॥ ૧॥

અઙ્ગનાનાં ચ વામાંગે દક્ષિણાઙ્ગે નૃણાં શુભમ્ ।
રક્તાભં તિલકાભં વા લોમ્નાં ચક્રમથાપિ વા ॥ ૨॥

તિલાદિલાંછનં સ્ત્રીણાં હૃદિ સૌભાગ્યસૂચકમ્ ।
યસ્યા દક્ષિણવક્ષોજે રક્તે તિલકલાંછને ॥ ૩॥

સા સન્તતિતતિં સૂતે સુખસૌભાગ્યસંયુતામ્ ।
રક્તાભં તિલકં યસ્યાઃ સ્ત્રિયા વામે સ્તને ભવેત્ ॥ ૪॥

એક એવ સુતસ્તસ્યા ભવતીત વિદો વિદુઃ ।
પુત્રીપુત્રયુતા જ્ઞેયા તિલકે દક્ષિણે સ્તને ॥ ૫॥

ભ્રુવોર્મધ્યે લલાટે વા લાંછનં રાજસૂચકમ્ ।
કપોલે મશકો રક્તો નિત્યં મિષ્ઠાન્નદાયકમ્ ॥ ૬॥

ભગસ્ય દક્ષિણે ભાગે લાંછનં યદિ યોષિતઃ ।
સા હિ પૃથ્વીપતેઃ પત્ની સૂતે વા ભૂપતિં સુતમ્ ॥ ૭॥

નાસાગ્રે લાઞ્છને રક્તં રાજપત્ન્યાઃ પ્રજાયતે ।
કૃષ્ણવર્ણં તુ યસ્યાઃ સા પુંશ્ચલિ વિધવાઽથ વા ॥ ૮॥

નાભેરધો નૃણાં સ્ત્રીણાં લાઞ્છનં ચ શુભપ્રદમ્ ।
કર્ણે ગણ્ડે કરે વાઽપિ કણ્ઠે વાઽપ્યથ લાઞ્છનમ્ ॥ ૯॥

પ્રાગ્ગર્ભે પુત્રદં જ્ઞેયં સુખસૌભાગ્યદં તથા ।
તિલાદિ લાઞ્છનં વિપ્ર ગુલ્ફગેશે ચ દુઃખદમ્ ॥ ૧૦॥

ત્રિશૂલાકૃતિ ચિહ્ન ચ લલાટે યદિ જાયતે ।
નારી રાજપ્રિયા જ્ઞેયા ભૂપતિશ્ચ નરો ભવેત્ ॥ ૧૧॥

લોમ્નાં પ્રદક્ષિણાવર્તો હૃદિ નાભૌ કરે શ્રુતૌ ।
દક્ષપૃષ્ઠે શુભો વસ્તૌ વામાવર્તોઽશુભપ્રદઃ ॥ ૧૨॥

કટ્યાં ગુહ્યેઽથવાઽવર્તો સ્ત્રીણાં દૌર્ભાગ્યસૂચકઃ ।
ઉદરે હન્તિ ભર્તારં મધ્યપૃષ્ઠે ચ પુંશ્ચલી ॥ ૧૩॥

કણ્ઠે લલાટે સીમન્તે મધ્યભાગે ચ મૂર્ધનિ ।
આવર્તો ન શુભઃ સ્ત્રીણાં પુસાં વાઽપિ દ્વિજોત્તમ ॥ ૧૪॥

સુલક્ષણા સુચરિતા અપિ મન્દાયુષં પતિમ્ ।
દીર્ઘાયુષં પ્રકુર્વન્તિ પ્રમદાશ્ચ મુદાસ્પદમ્ ॥ ૧૫॥

---

## અથ પૂર્વજન્મશાપદ્યોતનાધ્યાયઃ ॥ ૮૩॥

મહર્ષે ભવતા પ્રોક્તં ફલં સ્ત્રીણાં નૃણાં પૃથક્ ।
અધુના શ્રોતુમિચ્છામિ ત્વત્તો વેદવિદાંવર ॥ ૧॥

અપુત્રસ્ય ગતિર્નાસ્તિ શાસ્ત્રેષુ શ્રૂયતે મુને ।
અપુત્રઃ કેન પાપેન ભવતીતિ વદ પ્રભો ॥ ૨॥

જન્મલગ્નાચ્ચ તજ્જ્ઞાનં કથં દૈવવિદાં ભવેત્ ।
અપુત્રસ્ય સુતપ્રાપ્તેરુપાયં કૃપયોચ્યતામ્ ॥ ૩॥

સાધુ પૃષ્ટં ત્વયા વિપ્ર કથ્યતે હિ તથા મયા ।

યથોમયા હિ પૃષ્ટેન શિવેન કથિતં પુરા ॥ ૪॥

કેન યોગેન પાપેન જ્ઞાયતેऽપત્યનાશનમ્ ।
તેષાં ચ રક્ષણોપાયં કૃપયા નાથ મે વદ ॥ ૫॥

સાધુ પૃષ્ટં ત્વયા દેવિ કથયામિ તવાऽધુના ।
સન્તાનહાનિયોગાંશ્ચ તદ્રક્ષોપાયસંયુતાન્ ॥ ૬॥

ગુરુલગ્નેશ દારેશપુત્રસ્થાનાધિપેષુ ચ ।
સર્વેષુ બલહીનેષુ વક્તવ્યા ત્વનપત્યતા ॥ ૭॥

રવ્યારરાહુશનયઃ સબલાઃ પુત્રભાવગાઃ ।
તદાऽનપત્યતા ચેત્ સ્યુરબલાઃ પુત્રકારકાઃ ॥ ૮॥

પુત્રસ્થાનગતે રાહૌ કુજેન ચ નિરીક્ષિતે ।
કુજક્ષેત્રગતે વાऽપિ સર્પશાપાત્ સુતક્ષયઃ ॥ ૯॥

પુત્રશે રાહુસંયુક્તે પુત્રસ્થે ભાનુનન્દને ।
ચન્દ્રેણ સંયુતે દૃષ્ટે સર્પશાપાત્ સુતક્ષયઃ ॥ ૧૦॥

કારકે રાહુસંયુક્તે પુત્રેશે બલવર્જિતે ।
લગ્નેશે કુજસંયુક્તે સર્પશાપાત્ સુતક્ષયઃ ॥ ૧૧॥

કારકે ભૌમસંયુક્તે લગ્ને ચ રાહુસંયુતે ।
પુત્રસ્થાનાધિપે દુઃસ્થે સર્પશાપાત્ સુતક્ષયઃ ॥ ૧૨॥

ભૌમાંશે ભૌમસંયુક્તે પુત્રેશે સોમનન્દને ।
રાહુમાન્દિયુતે લગ્ને સર્પશાપાત્ સુતક્ષયઃ ॥ ૧૩॥

પુત્રભાવે કુજક્ષેત્રે પુત્રેશે રાહુસંયુતે ।
સૌમ્યદૃષ્ટે યુતે વાऽપિ સર્પશાપાત્ સુતક્ષયઃ ॥ ૧૪॥

પુત્રસ્થા ભાનુમન્દારાઃ સ્વભાનુઃ શશિજોऽઙ્ગિરાઃ ।
નિર્બલૌ પુત્રલગ્નેશૌ સર્પશાપાત્ સુતક્ષયઃ ॥ ૧૫॥

લગ્નેશે રાહુસંયુક્તે પુત્રેશે ભોમસંયુતે ।
કારકે રાહુયુક્તે વા સર્પશાપાત્ સુતક્ષયઃ ॥ ૧૬॥

ગ્રહયોગવશેનૈવં નૃણાં જ્ઞાત્વાऽનપત્યતા ।
તદ્દોષપરિહારાર્થં નાગપૂજાં સમારભેત્ ॥ ૧૭॥

સ્વગૃહ્યોક્તવિધાનેન પ્રતિષ્ઠાં કારયેત્ સુધીઃ ।
નાગમૂર્તિં સુવર્ણેન કૃત્વા પૂજાં સમાચરેત્ ॥ ૧૮॥

ગોભૂતિલહિરણ્યાદિ દદ્યાદ્ વિત્તાનુસારતઃ ।
એવં કૃતે તુ નાગેન્દ્રપ્રસાદાત્ વર્ધતે કુલમ્ ॥ ૧૯॥

પુત્રસ્થાનં ગતે ભાનૌ નીચે મન્દાંશકસ્થિતે ।
પાર્શ્વયોઃ ક્રૂરસમ્બન્ધે પિતૃશાપાત્ સુતક્ષયઃ ॥ ૨૦॥

પુત્રસ્થાનાધિપે ભાનૌ ત્રિકોણે પાપસંયુતે ।
ક્રૂરાન્તરે પાપદૃષ્ટે પિતૃશાપાત્ સુતક્ષયઃ ॥ ૨૧॥

ભાનુરાશિસ્થિતે જીવે પુત્રેશે ભાનુસંયુતે ।
પુત્રે લગ્ને ચ પાપાઢ્યે પિતૃશાપાત્ સુતક્ષયઃ ॥ ૨૨॥

લગ્નેશે દુર્બલે પુત્રે પુત્રેશે ભાનુસંયુતે ।
પુત્રે લગ્ને પાપયુતે પિતૃશાપાત્ સુતક્ષયઃ ॥ ૨૩॥

પિતૃસ્થાનાધિપે પુત્રે પુત્રેશે વાપિ કર્મગે ।
પુત્રે લગ્ને ચ પાપાઢ્યે પિતૃશાપાત્ સુતક્ષયઃ ॥ ૨૪॥

પિતૃસ્થાનાધિપે ભૌમઃ પુત્રેશેન સમન્વિતઃ ।
લગ્ને પુત્રે પિતૃસ્થાને પાપે સન્તતિનાશનમ્ ॥ ૨૫॥

પિતૃસ્થાનાધિપે દુઃસ્થે કારકે પાપરાશિગે ।
સપાપૌ પુત્રલગ્નેશૌ પિતૃશાપાત્ સુતક્ષયઃ ॥ ૨૬॥

લગ્નપઞ્ચમભાવસ્થા ભાનુભૌમશનૈશ્ચરાઃ ।
રન્ધ્રે રિષ્ફે રાહુજીવૌ પિતૃશાપાત્ સુતક્ષયઃ ॥ ૨૭॥

લગ્નાદષ્ટમગે ભાનૌ પુત્રસ્થે ભાનુનન્દને ।
પુત્રેશે રાહુસંયુક્તે લગ્ને પાપે સુતક્ષયઃ ॥ ૨૮॥

વ્યયેશે લગ્નભાવસ્થે રન્ધ્રેશે પુત્રરાશિગે ।
પિતૃસ્થાનાધિપે રન્ધ્રે પિતૃશાપાત્ સુતક્ષયઃ ॥ ૨૯॥

રોગેશે પુત્રભાવસ્થે પિતૃસ્થાનાધિપે રિપૌ ।
કારકે રાહુસંયુક્તે પિતૃશાપાત્ સુતક્ષયઃ ॥ ૩૦॥

તદ્દોષપરિહારાર્થં ગયાશ્રાદ્ધં ચ કારયેત્ ।
બ્રાહ્મણાન્ ભોજયેદત્ર અયુતં વા સહસ્રકમ્ ॥ ૩૧॥

અથવા કન્યકાદાનં ગોદાનં ચ સમાચરેત્ ।
એવં કૃતે પિતુઃ શાપાન્મુચ્યતે નાઽત્ર સંશયઃ ॥ ૩૨॥

વર્ધતે ચ કુલં તસ્ય પુત્રપૌત્રદિભિઃ સદા ।
ગ્રહયોગવશાદેવં ફલં બ્રૂયાત્ વિચક્ષણઃ ॥ ૩૩॥

પુત્રસ્થાનાધિપે ચન્દ્રે નીચે વા પાપમધ્યગે ।
હિબુકે પઞ્ચમે પાપે માતૃશાપાત્ સુતક્ષયઃ ॥ ૩૪॥

લાભે મન્દસમાયુક્તે માતૃસ્થાને શુભેતરે ।
નીચે પઞ્ચમગે ચન્દ્રે માતૃશાપાત્ સુતક્ષયઃ ॥ ૩૫॥

પુત્રસ્થાનાધિપે દુઃસ્થે લગ્નેશે નીચરાશિગે ।
ચન્દ્રે ચ પાપસંયુક્તે માતૃશાપાત્ સુતક્ષયઃ ॥ ૩૬॥

પુત્રેશેઽષ્ટારિરિષ્ફેસ્થે ચન્દ્રે પાપાંશસંગતે ।
લગ્ને પુત્રે ચ પાપાઢ્યે માતૃશાપાત્ સુતક્ષયઃ ॥ ૩૭॥

પુત્રસ્થાનાધિપે ચન્દ્રે મન્દરાહ્વારસંયુતે ।
ભાગ્યે વા પુત્રભાવે વા માતૃશાપાત્ સુતક્ષયઃ ॥ ૩૮॥

માતૃસ્થાનાધિપે ભૌમે શનિરાહુસમન્વિતે ।
ચન્દ્રભાનુયુતે પુત્રે લગ્ને વા સન્તતિક્ષયઃ ॥ ૩૯॥

લગ્નાત્મજેશૌ શત્રુસ્થૌ રન્ધ્રે માત્રધિપઃ સ્થિતઃ ।
પિતૃનાશાધિપૌ લગ્ને માતૃશાપાત્ સુતક્ષયઃ ॥ ૪૦॥

ષષ્ઠાષ્ટમેશૌ લગ્નસ્થૌ વ્યયે માત્રધિપઃ સુતે ।
ચન્દ્રજીવૌ પાપયુક્તૌ માતૃશાપાત્ સુતક્ષયઃ ॥ ૪૧॥

પાપમધ્યગતે લગ્ને ક્ષીણે ચન્દ્રે ચ સપ્તમ ।
માતૃપુત્રે રાહુમન્દૌ માતૃશાપાત્ સુતક્ષયઃ ॥ ૪૨॥

નાશસ્થાનાધિપે પુત્રે પુત્રેશે નાશરાશિગે ।
ચન્દ્રમાતૃપતૌ દુઃસ્થે માતૃશાપાત્ સુતક્ષયઃ ॥ ૪૩॥

ચન્દ્રક્ષેત્રે યદા લગ્ને કુજરાહુસમન્વિતે ।
ચન્દ્રમન્દૌ પુત્રસંસ્થૌ માતૃશાપાત્ સુતક્ષયઃ ॥ ૪૪॥

લગ્ને પુત્રે મૃતૌ રિષ્ફે કુજો રાહૂ રવિઃ શનિઃ ।

માતૃલગ્નાધિપૌ દુઃસ્થૌ માતૃશાપાત્ સુતક્ષયઃ ॥ ૪૫॥

નાશસ્થાનં ગતે જીવે કુજરાહુસમન્વિતે ।
પુત્રસ્થાનૌ મન્દચન્દ્રૌ માતૃશાપાત્ સુતક્ષયઃ ॥ ૪૬॥

એવં યોગં બુધૈર્દૃષ્ટ્વા વિજ્ઞેયા ત્વનપત્યતા ।
તતઃ સન્તાનરક્ષાર્થં કર્ત્તવ્યા શાન્તિરુત્તમા ॥ ૪૭॥

સેતુસ્નાનં પ્રકર્તવ્યં ગાયત્રીલક્ષસંખ્યકા ।
રૌપ્યમાત્રં પયઃ પીત્વા ગ્રહદાનં પ્રયત્નતઃ ॥ ૪૮॥

બ્રાહ્મણાન્ ભોજયેત્તદ્વદશ્વત્થસ્ય પ્રદક્ષિણમ્ ।
કર્તવ્યં ભક્તિયુક્તેન ચાષ્ટોત્તરસહસ્રકમ્ ॥ ૪૯॥

એવં કૃતે મહાદેવિ શાપાન્મોક્ષો ભવિષ્યતિ ।
સુપુત્રં લભતે પશ્ચાત્ કુલવૃદ્ધિશ્ચ જાયતે ॥ ૫૦॥

અથો યોગાન્ પ્રવક્ષ્યામિ ભ્રાતૃશાપસમુદ્ભવાન્ ।
યજ્જ્ઞાત્વાઽપત્યરક્ષાર્થં યત્નં કુર્યાદ્ વિચક્ષણઃ ॥ ૫૧॥

ભ્રાતૃસ્થાનાધિપે પુત્રે કુજરાહુસમન્વિતે ।
પુત્રલગ્નેશ્વરૌ રન્ધ્રે ભ્રાતૃશાપાત્ સુતક્ષયઃ ॥ ૫૨॥

લગ્ને સુતે કુજે મન્દે ભ્રાતૃપે ભાગ્યરાશિગે ।
કારકે નાશભાવસ્થે ભ્રાતૃશાપાત્ સુતક્ષયઃ ॥ ૫૩॥

ભ્રાતૃસ્થાને ગુરુર્નીચે મન્દઃ પઞ્ચમગતે યદિ ।
નાશસ્થાને તુ ચન્દ્રારૌ ભ્રાતૃશાપાત્ સુતક્ષયઃ ॥ ૫૪॥

તનુસ્થાનાધિપે રિષ્ફે ભૌમઃ પઞ્ચમગો યદિ ।
રન્ધ્રે સપાપપુત્રેશે ભ્રાતૃશાપાત્ સુતક્ષયઃ ॥ ૫૫॥

પાપમધ્યગતે લગ્ને પાપમધ્યે સુતેઽપિ ચ ।
લગ્નેશપુત્રપૌ દુઃસ્થૌ ભ્રાતૃશાપાત્ સુતક્ષયઃ ॥ ૫૬॥

કર્મેશે ભ્રાતૃભાવસ્થે પાપયુક્તે તથા શુભે ।
પુત્રગે કુજસંયુક્તે ભ્રાતૃશાપાત્ સુતક્ષયઃ ॥ ૫૭॥

પુત્રસ્થાને બુધક્ષેત્રે શમિરાહુસમન્વિતે ।
રિષ્ફે વિદારૌ વિજ્ઞેયો ભ્રાતૃશાપાત્ સુતક્ષયઃ ॥ ૫૮॥

લગ્નેશે ભ્રાતૃભાવસ્થે ભ્રાતૃસ્થાનાધિપે સુતે ।
લગ્નભ્રાતૃસુતે પાપે ભ્રાતૃશાપાત્ સુતક્ષયઃ ॥ ૫૯॥

ભ્રાત્રીશે મૃત્યુભાવસ્થે પુત્રસ્થે કારકે તથા ।
રાહુમન્દેયુતે દૃષ્ટે ભ્રાતૃશાપાત્ સુતક્ષયઃ ॥ ૬૦॥

નાશસ્થાનાધિપે પુત્રે ભ્રાતૃનાથેન સંયુતે ।
રન્ધ્રે આરાર્કિસંયુક્તે ભ્રાતૃશાપાત્ સુતક્ષયઃ ॥ ૬૧॥

ભ્રાતૃશાપવિમોક્ષાર્થં વંશસ્ય શ્રવણં હરેઃ ।
ચાન્દ્રાયણસ્ં ચરેત્ પશ્ચાત્ કાવેર્ય્યાં વિષ્ણુસન્નિધૌ ॥ ૬૨॥

અશ્વત્થસ્થાપનં કુર્યાદ્ દશધેનૂશ્ચ દાપયેત્ ।
પત્નીહસ્તેન પુત્રેચ્છુર્ભૂમિં દદ્યાત્ ફલાન્વિતામ્ ॥ ૬૩॥

એવં યઃ કુરુતે ભક્ત્યા ધર્મપત્ન્યા સમન્વિતઃ ।
ધ્રુવં તસ્ય ભવેત્ પુત્રઃ કુલવૃદ્ધિશ્ચ જાયતે ॥ ૬૪॥

પુત્રસ્થાને બુધે જીવે કુજરાહુસમન્વિતે ।
લગ્ને મન્દે સુતભાવો જ્ઞેયો માતુલશાપતઃ ॥ ૬૫॥

લગ્નેપુત્રેશ્વરૌ પુત્રે બુધભૌમાર્કિસંયુતૌ ।
જ્ઞેયં માતુલશાપત્વાજ્જનસ્ય સન્તતિક્ષયઃ ॥ ૬૬॥

લુપ્તે પુત્રાધિપે લગ્ને સપ્તમે ભાનુનન્દને ।
લગ્નેશે બુધસંયુક્તે તસ્યાપિ સન્તતિક્ષયઃ ॥ ૬૭॥

જ્ઞાતિસ્થાનાધિપે લગ્ને વ્યયેશેન સમન્વિતે ।
શશિસૌમ્યકુજે પુત્રે વિજ્ઞેયઃ સન્તતિક્ષયઃ ॥ ૬૮॥

તદ્દોષપરિહારાર્થં વિષ્ણુસ્થાપરમાચરેત્ ।
વાપીકૂપતડાગાદિખનનં સુતબન્ધુનમ્ ॥ ૬૯॥

પુત્રવૃદ્ધિર્ભવેત્તસ્ય સમ્પદ્વૃદ્ધિઃ પ્રજાયતે ।
ઇતિ યોગવશાદેવં શાન્તિં કુર્યાદ્ વિચક્ષણઃ ॥ ૭૦॥

બલગર્વ્વં યો મર્ત્યો બ્રાહ્મણાનવમન્યતે ।
તદ્દોષાદ્ બ્રહ્મશાપાચ્ચ તસ્ય સ્યાત્ સન્તતિક્ષયઃ ॥ ૭૧॥

ગુરુક્ષેત્રે યદા રાહુઃ પુત્રે જીવારભાનુજાઃ ।
ધર્મસ્થાનાધિપે નાશે બ્રહ્મશાપાત્ સુતક્ષયઃ ॥ ૭૨॥

ધર્મેશે પુત્રભાવસ્થે પુત્રેશે નાશરાશિગે ।
જીવારરાહુભિર્યુક્તે બ્રહ્મશાપાત્ સુતક્ષયઃ ॥ ૭૩॥

ધર્મભાવાધિપે નીચે વ્યયેશે પુત્રભાવગે ।
રાહુયુતેક્ષિતે વાપિ બ્રહ્મશાપાત્ સુતક્ષયઃ ॥ ૭૪॥

જીવે નીચગતે રાહૌ લગ્ને વા પુત્રરાશિગે ।
પુત્રસ્થાનાધિપે દુઃસ્થે બ્રહ્મશાપાત્ સુતક્ષયઃ ॥ ૭૫॥

પુત્રભાવાધિપે જીવે રન્ધ્રે પાપસમન્વિતે ।
પુત્રેશે સાર્કચન્દ્રે વા બ્રહ્મશાપાત્ સુતક્ષયઃ ॥ ૭૬॥

મન્દાંશે મન્દસંયુક્તે જીવે ભૌમસમન્વિતે ।
પુત્રેશે વ્યયરાશિસ્થે બ્રહ્મશાપાત્ સુતક્ષયઃ ॥ ૭૭॥

લગ્ને ગુરુયુતે મન્દે ભાગ્યે રાહુસમન્વિતે ।
વ્યય વા ગુરુસંયુક્તે બ્રહ્મશાપાત્ સુતક્ષયઃ ॥ ૭૮॥

તસ્ય દોષસ્ય શાન્ત્યર્થં કુર્યાચ્ચાન્દ્રાયણં નરઃ ।
બ્રહ્મકૃચ્છ્રત્રયં કૃત્વા ધનું દદ્યાત્ સદક્ષિણામ્ ॥ ૭૯॥

પઞ્ચરત્નાનિ દેયાનિ સુવર્ણસહિતાનિ ચ ।
બ્રાહ્મણાન્ ભોજયેત્ પશ્ચાદ્યથાશક્તિ દ્વિજોત્તમ ॥ ૮૦॥

એવં કૃતે તુ સત્પુત્રં લભતે નાઽત્ર સંશયઃ ।
મુક્તશાપો વિશુદ્ધાત્મા સ નરઃ સુખમેધતે ॥ ૮૧॥

દારેશે પુત્રભાવસ્થે દારેશસ્યાંશપે શનૌ ।
પુત્રેશે નાશરાશિસ્થે પત્નીશાપાત્ સુતક્ષયઃ ॥ ૮૨॥

નાશસંસ્થે કલત્રેશે પુત્રેશે નાશરાશિગે ।
કારકે પાપસંયુક્તે પત્નીશાપાત્ સુતક્ષયઃ ॥ ૮૩॥

પુત્રસ્થાનગતે શુક્રે કામપે રન્ધ્રમાશ્રિતે ।
કારકે પાપસંયુક્તે પત્નીશાપાત્ સુતક્ષયઃ ॥ ૮૪॥

કુટુમ્બે પાપસંયુક્તે કામપે નાશરાશિગે ।
પુત્રે પાપગ્રહૈર્યુક્તે પત્નીશાપાત્ સુતક્ષયઃ ॥ ૮૫॥

ભાગ્યસ્થાનગતે શુક્રે દારેશે નાશરાશિગે ।

લગ્ને સુતે ચ પાપઢ્યે પત્નીશાપાત્ સુતક્ષયઃ ॥ ૮૬॥

ભાગ્યસ્થાનાધિપે શુક્રે પુત્રેશે શત્રુરાશિગે ।
ગુરુલગ્નેશદારેશા દુઃસ્થાશ્ચેત્ સન્તતિક્ષયઃ ॥ ૮૭॥

પુત્રસ્થાને ભૃગુક્ષેત્રે રાહુચન્દ્રસમન્વિતે ।
વ્યયે લગ્ને ધને પાપે પત્નીશાપાત્ સુતક્ષયઃ ॥ ૮૮॥

સપ્તમે મન્દશુક્રૌ ચ રન્ધ્રેશે પુત્રભે રવૌ ।
લગ્ને રાહુસમાયુક્તે પત્નીશાપાત્ સુતક્ષયઃ ॥ ૮૯॥

ધને કુજે વ્યયે જીવે પુત્રસ્થે ભૃગુનન્દને ।
શનિરાહુયુતે દૃષ્ટે પત્નીશાપાત્ સુતક્ષયઃ ॥ ૯૦॥

નાશસ્થૌ વિત્તદારેશૌ પુત્રે લગ્ને કુજે શનૌ ।
કારકે પાપસંયુક્તે પત્નીશાપાત્ સુતક્ષયઃ ॥ ૯૧॥

લગ્નપઞ્ચમભાગ્યસ્થા રાહુમન્દકુજાઃ ક્રમાત્ ।
રન્ધ્રસ્થૌ પુત્રદારેશૌ પત્નીશાપાત્ સુતક્ષયઃ ॥ ૯૨॥

શાપમુક્ત્યૈ ચ કન્યાયાં સત્યાં તદ્દાનમાચરેત્ ।
કન્યાભાવે ચ શ્રીવિષ્ણોર્મૂર્તિં લક્ષ્મીસમન્વિતામ્ ॥ ૯૩॥

દદ્યાત્ સ્વર્ણમયીં વિપ્ર દશદેનુસમન્વિતામ્ ।
શય્યાં ચ ભૂષણં વસ્ત્રં દમ્પતિભ્યાં દ્વિજન્મનામ્ ॥ ૯૪॥

ધ્રુવં તસ્ય ભવેત્ પુત્રો ભાગ્યવૃદ્ધિશ્ચ જાયતે ।
કર્મલોપે પિતૄણાં ચ પ્રેતત્વં તસ્ય જાયતે ॥ ૯૫॥

તસ્ય પ્રેતસ્ય શાપાચ્ચ પુત્રાભાવઃ પ્રજાયતે ।
અતોઽત્ર તાદૃશાન્ યોગાત્ જન્મલગ્નાત્ પ્રવચ્મ્યહમ્ ॥ ૯૬॥

પુત્રસ્થાનૌ મન્દસૂર્યૌ ક્ષીણચન્દ્રશ્ચ સપ્તમે ।
લગ્ને વ્યયે રાહુજીવૌ પ્રેતશાપાત્ સુતક્ષયઃ ॥ ૯૭॥

પુત્રસ્થાનાધિપે મન્દે નાશસ્થે લગ્નગે કુજે ।
કારકે નાશભાવે ચ પ્રેતશાપાત્ સુતક્ષયઃ ॥ ૯૮॥

લગ્ને પાપે વ્યયે ભાનૌ સુતે ચારાર્કિસોમજાઃ ।
પુત્રેશે રન્ધ્રભાવસ્થે પ્રેતશાપાત્ સુતક્ષયઃ ॥ ૯૯॥

લગ્ને સ્વર્ભાનુના યુક્તે પુત્રસ્થે ભાનુનન્દને ।
ગુરૌ ચ નાશરાશિસ્થે પ્રેતશાપાત્ સુતક્ષયઃ ॥ ૧૦૦॥

લગ્ને રાહૌ સશુક્રેજ્યે ચન્દ્રે મન્દયુતે તથા ।
લગ્નેશે મૃત્યુરાશિસ્થે પ્રેતશાપાત્ સુતક્ષયઃ ॥ ૧૦૧॥

પુત્રસ્થાનાધિપે નીચે કારકે નીચરાશિગે ।
નીચસ્થગ્રહદૃષ્ટે ચ પ્રેતશાપાત્ સુતક્ષયઃ ॥ ૧૦૨॥

લગ્ને મન્દે સુતે રાહૌ રન્ધ્રે ભાનુસમન્વિતે ।
વ્યયે ભૌમેન સંયુક્તે પ્રેતશાપાત્ સુતક્ષયઃ ॥ ૧૦૩॥

કામસ્થાનાધિપે દુઃસ્થે પુત્રે ચન્દ્રસમન્વિતે ।
મન્દમાન્દિયુતે લગ્ને પ્રેતશાપાત્ સુતક્ષયઃ ॥ ૧૦૪॥

વધસ્થાનાધિપે પુત્રે શનિશુક્રસમન્વિતે ।
કારકે નાશરાશિસ્થે પ્રેતશાપાત્ સુતક્ષયઃ ॥ ૧૦૫॥

અસ્ય દોષસ્ય શાન્ત્યર્થં ગયાશ્રાદ્ધં સમાચરેત્ ।
કુર્યાદ્રુદ્રાભિષેકઞ્ચ બ્રહ્મમૂર્તિં પ્રદાપયેત્ ॥ ૧૦૬॥

ધેનું રજતપાત્રં ચ તથા નીલમણિં દ્વિજ ।
બ્રાહ્મણાન્ ભોજયેત્ પશ્ચાત્ તેભ્યશ્ચ દક્ષિણાં દિશેત્ ॥ ૧૦૭॥

એવં કૃતે મનુષ્યસ્ય શાપમોક્ષા પ્રજાયતે ।
પુત્રોત્પત્તિર્ભવેત્તસ્ય કુલવૃદ્ધિશ્ચ જાયતે ॥ ૧૦૮॥

તથા જ્ઞશુક્રજે દોષે પુત્રાપ્તિઃ શમ્ભુપૂજનાત્ ।
જીવચન્દ્રકૃતે વિપ્ર મન્ત્રયન્ત્રૌષધાદિતઃ ॥ ૧૦૯॥

રાહુજે કન્યકાદાનાત્ સૂર્યજે હરિકીર્તનાત્ ।
ગોદાનાત્ કેતુજે દોષે રુદ્રજાપાત્ કુજાઽર્કિજે ॥ ૧૧૦॥

સર્વદોષવિનાશાય શુભસન્તાનલબ્ધયે ।
હરિવંશકથા ભક્ત્યા શ્રોતવ્યા વિધિના દ્વિજ ॥ ૧૧૧॥

---

અથ ગ્રહશાન્ત્યધ્યાયઃ ॥ ૮૪॥

ગ્રહાણાં દોષશાન્ત્યર્થં તેષાં પૂજાવિધિં વદ ।
માનવાનાં હિતાર્થાય સંક્ષેપાત્ કૃપયા મુને ॥ ૧॥

ગ્રહા સૂર્યાદયઃ પૂર્વં મયા પ્રોક્તા દ્વિજોત્તમ ।
જગત્યાં સર્વજન્તૂનાં તદધીનં સુખાઽસુખમ્ ॥ ૨॥

તસ્માત્ સુશાન્તિકામો વા શ્રીકામો વા સુચેતસા ।
વૃષ્ટાયાયુઃ પુષ્ટિકામો વા તેષાં યજ્ઞં સમાચરેત્ ॥ ૩॥

તાભ્રાચ્ચ સ્ફટિકાદ્રક્તચન્દનાત્ સ્વર્ણકાદુભૌ ।
રજતાદયસઃ સીસાત્ કાંસ્યાત્ કાર્યાઃ ક્રમદ્ ગ્રહાઃ ॥ ૪॥

પૂર્વોક્તૈઃ સ્વસ્વવર્ણૈર્વા પટે લેખ્યા દ્વિજોત્તમૈઃ ।
સ્વસ્વોક્તદિગ્વિભાગેષુ ગન્ધાદ્યૈર્મણ્ડનેષુ વા ॥ ૫॥

પદ્માસનઃ પદ્મહસ્તઃ પદ્મપત્રસમદ્યુતિઃ ।
સપ્તાશ્વરથસંસ્થશ્ચ દ્વિભુજશ્ચ દિવાકરઃ ॥ ૬॥

શ્વેતઃ શ્વેતામ્બરો દેવો દશાશ્વઃ શ્વેતભૂષણઃ ।
ગદાહસ્તો દ્વિબાહુશ્ચ વિધાતવ્યો વિધુર્દ્વિજ ॥ ૭॥

રક્તમાલ્યામ્બરધરો શક્તિશૂલગદાધરઃ ।
વરદસ્તુ ચતુર્બાહુર્મઙ્ગલો મેષવાહનઃ ॥ ૮॥

પીતમાલ્યામ્બરધરઃ કર્ણિકારસમદ્યુતિઃ ।
ખડ્ગચર્મગદાપાણિઃ સિંહસ્થો વરદો બુધઃ ॥ ૯॥

ગુરુશુક્રૌ ક્રમાત્ પીતશ્વેતવર્ણૌ ચતુર્ભુજૌ ।
દણ્ડિનૌ વરદૌ કાર્યૌ સાક્ષસૂત્રકમણ્ડલૂ ॥ ૧૦॥

ઇન્દ્રનીલદ્યુતિઃ શૂલી વરદો ગૃધ્રવાહનઃ ।
વાણવાણાસનધરો વિજ્ઞેયોઽર્કસુતો દ્વિજ ॥ ૧૧॥

કરાલવદનઃ ખડ્ગચર્મશૂલી વરપ્રદઃ ।
સિંહસ્થો નીલવર્ણશ્ચ રાહુરેવં પ્રકલ્પ્યતે ॥ ૧૨॥

ધૂમ્રા દ્વિબાહવઃ સર્વે ગદિનો વિકૃતાનનાઃ ।
ગૃધ્રાસના નિત્યં કેતવઃ સ્યુર્વરપ્રદા ॥ ૧૩॥

સર્વે કિરીટિનઃ કાર્યા ગ્રહા લોકહિતપ્રદાઃ ।
સ્વાંગુલેનોચ્છ્રિતા વિજ્ઞૈઃ શતમષ્ટોત્તરં સદા ॥ ૧૪॥

યથાવર્ણં પ્રદેયાનિ સુદ્ષ્પાણિ વસનાનિ ચ ।

ગન્ધો દીપો બલિશ્ચૈવ ધૂપો દેયશ્ચ ગુગ્ગુલુઃ ॥ ૧૫॥

યસ્ય ગ્રહસ્ય યદ્દ્રવ્યમન્નં યસ્ય ચ યત્ પ્રિયમ્ ।
તચ્ચ તસ્યૈ પ્રદાતવ્યં ભક્તિયુક્તેન ચેતસા ॥ ૧૬॥

આકૃષ્ણેન ઇમં દેવા અગ્નિર્મૂર્ધા દિવઃ કકુત્ ।
ઉદ્બુધ્યસ્વેતિ મન્ત્રાંશ્ચ જપેદથ બૃહસ્પતે ॥ ૧૭॥

અન્નાત્ પરિશ્રુતશ્ચેતિ શન્નો દેવીરભીષ્ટયે ।
કયા નશ્ચિત્ર ઇત્યેવં કેતુ કૃણ્વન્નિમાંસ્તથા ॥ ૧૮॥

સપ્ત રુદ્રા દિશો નન્દા નવચન્દ્રા નૃપાસ્તથા ।
ત્રિપક્ષા અષ્ટચન્દ્રાશ્ચ સપ્તચન્દ્રાસ્તથૈવ ચ ॥ ૧૯॥

ઇમાઃ સંખ્યાઃ સહસ્રઘ્ના જપસંખ્યાઃ પ્રકીર્તિતાઃ ।
ક્રમાદર્કાદિખેટાનાં પ્રીત્યર્થં દ્વિજપુઙ્ગવ ॥ ૨૦॥

અર્કઃ પલાશઃ ખદિરસ્ત્વપામાર્ગસ્તુ પિપ્પલઃ ।
ઉદુમ્બરઃ શમી દુર્વા કુશાશ્ચ સમિધઃ ક્રમાત્ ॥ ૨૧॥

હોતવ્યા મધુસર્પિભ્યાં દધ્ના ક્ષીરેણ વા યુતાઃ ।
એકૈકસ્ય ત્વષ્ટ શતમષ્ટાવિંશતિરેવ વા ॥ ૨૨॥

ગુડૈદનં પાયસં ચ હવિષ્યં ક્ષીરષાષ્ટિકમ્ ।
દધ્યોદનં હવિશ્ચૂર્ણં માંસં ચિત્રાન્નમેવ ચ ॥ ૨૩॥

દદ્યાદ્ ગ્રહક્રમાદેવં વિપ્રેભ્યો ભોજનં દ્વિજ ।
શક્તિતો વા યથાલાભં દેયં સત્કારપૂર્વકમ્ ॥ ૨૪॥

ધેનુઃ શઙ્ખસ્તથાઽનડ્વાન્ હેમ વાસો હયઃ ક્રમાત્ ।
કૃષ્ણા ગૌરાયસં છાગ એતા રવ્યાદિદક્ષિણાઃ ॥ ૨૫॥

યસ્ય યશ્ચ યદા દુઃસ્થઃ સ તં યત્નેન પૂજયેત્ ।
એષાં ધાત્રા વરો દત્તઃ પૂજિતાઃ પૂજયિષ્યથ ॥ ૨૬॥

માનવાનાં ગ્રહાધીના ઉચ્છ્રાયાઃ પતનાનિ ચ ।
ભાવાઽભાવૌ ચ જગતાં તસ્માત્ પૂજ્યતમા ગ્રહાઃ ॥ ૨૭॥

અથઽશુભજન્મકથનાધ્યાયઃ ॥ ૮૫॥

અથાઽન્યત્ સમ્પ્રવક્ષ્યામિ સુલગ્ને સુગ્રહેષ્વપિ ।
યદન્યકારણેનાપિ ભવેજ્જન્માઽશુભપ્રદમ્ ॥ ૧॥

દર્શે કૃષ્ણાચતુર્દશ્યાં વિષ્ટ્યાં સોદરભે તથા ।
પિતૃભે સૂર્યસંક્રાન્તૌ પાતેઽર્કેન્દુગ્રહે તથા ॥ ૨॥

વ્યતીપાતાદિદુર્યોગે ગણ્ડાન્તે ત્રિવિધેઽપિ વા ।
યમઘણ્ટેઽવભે દગ્ધયોગે ત્રીતરજન્મ ચ ॥ ૩॥

પ્રસવસ્ય ત્રિકારેઽપિ જ્ઞેયં જન્માઽશુભપ્રદમ્ ।
શાન્ત્યા ભવતિ કલ્યાણં તદુપાયં ચ વચ્મ્યહમ્ ॥ ૪॥

---

## અથ દર્શજન્મશાન્ત્યધ્યાયઃ ॥ ૮૬॥

મૈત્રેય દર્શજાતાનાં માતાપિત્રોર્દરિદ્રતા ।
તદ્દોષપરિહારાય શાન્તિં કુર્યાદ્ વિચક્ષણઃ ॥ ૧॥

કલશસ્થાપનં કૃત્વા પ્રથમં વિધિપૂર્વકમ્ ।
ઉદુમ્બરટાશ્વત્થચૂતાનાં પલ્લવાંસ્તથા ॥ ૨॥

સનિમ્બાનાં ચ મૂલનિ ત્વચસ્તત્ર વિનિક્ષિપેત્ ।
પંચરત્નાનિ નિક્ષિપ્ય વસ્ત્રયુગ્મેન ચેષ્ટયેત્ ॥ ૩॥

સર્વે સમુદ્ર ઇતિ ચાઽપોહિષ્ઠાદિત્ર્યૃચેન ચ ।
આમન્ત્ર્ય કલશે તચ્ચ સ્થાપયેદ્ વહ્નિકોણકે ॥ ૪॥

દર્શસ્ય દેવયોશ્ચાઽથ ચન્દ્રભાસ્કરયોઃ ક્રમાત્ ।
પ્રતિમાં સ્વર્ણજાં નિત્યં રાજતીં તામ્રજાં તથા ॥ ૫॥

આપ્યાયસ્વેતિ મન્ત્રેનઽ સવિતા પશ્ચાત્તમેવ ચ ।
ઉપચારૈઃ સમારાધ્ય તતો હોમં સમાચરેત્ ॥ ૬॥

સમિધશ્ચ ચરું વિદ્વાન્ ક્રમેણ જુહુયાત્ વ્રતી ।
ભક્ત્યા સવિતૃમન્ત્રેણ સોમો ધેનુશ્ચ મન્ત્રતઃ ॥ ૭॥

અષ્ટોત્તરશતં વાપિ અષ્ટવિંશતિરેવ વા ।
અભિષેકં તથા કુર્યાત્ દમ્પત્યોશ્ચ સુપુત્રયોઃ ॥ ૮॥

હિરણ્યં રજતં ચૈવ કૃષ્ણધેનુશ્ચ દક્ષિણા ।
બ્રાહ્મણાન્ ભોજયેત્ શક્ત્યા તતઃ ક્ષેમમવાપ્નુયાત્ ॥ ૯॥

અથ કૃષ્ણચતુર્દશીજન્મ શાન્ત્યધ્યાયઃ ॥ ૮૭॥

કૃષ્ણપક્ષચતુર્દશ્યાઃ ષડ્ભાગેષુ ફલં ક્રમાત્ ।
જન્મ ચેત્ પ્રથમે ભાગે તદા જ્ઞેયં શુભં દ્વિજ ॥ ૧॥

દ્વિતીયે પિતરં હન્તિ માતરં ચ તૃતીયકે ।
ચતુર્થે માતુલં ચૈવ પઞ્ચમે વંશનાશનમ્ ॥ ૨॥

ષષ્ઠે તુ ધનનાશઃ સ્યાદાત્મનો નાશ એવ વા ।
તદ્દોષપરિહારાર્થં શાન્તિં કુર્યાદ્ પ્રયત્નતઃ ॥ ૩॥

શિવસ્ય પ્રતિમાં કુર્યાત્ સૌવર્ણીં કર્ષસમ્મિતામ્ ।
તદર્ધાર્ધમિતાં વાઽપિ યથાવિત્તં મનોહરામ્ ॥ ૪॥

બાલચન્દ્રકિરીટાઞ્ચ શ્વેતમાલ્યામ્બરાન્વિતામ્ ।
ત્રિનેત્રાં ચ વૃષાસીનાં વરાભયકરામથ ॥ ૫॥

ત્રયમ્બકં ચેતિ મન્ત્રેણ પૂજાં કુર્યાદતન્દ્રિતઃ ।
આવાહ્ય વારુણૈર્મન્ત્રૈરાચાર્યો મન્ત્રતત્ત્વવિત્ ॥ ૬॥

ઇમં મે વરુણે ત્યેવં તત્ત્વા યામી ત્યૃચા પુનઃ ।
ત્ત્વન્ન અગ્ને ઇત્યનયા સત્વં નો ઇત્યૃચાપિ ચ ॥ ૭॥

આગ્નેયં કુમ્ભમારભ્ય પૂજયેદ્ ભક્તિતઃ ક્રમાત્ ।
આ નોભદ્રેતિ સૂક્તં ચ ભદ્રા અગ્નેશ્ચ સૂક્તકમ્ ॥ ૮॥

જપ્ત્વા પુરુષસૂક્તં ચ કન્દ્રુદ્રેતિ તથા જપેત્ ।
શઙ્કરસ્યાઽભિષેકં ચ ગ્રહપૂજાં ચ કારયેત્ ॥ ૯॥

સમિદાજ્યચરૂંશ્ચૈવ તિલમાષાંશ્ચ સર્પપાન્ ।
અશ્વસ્થલ્પક્ષપાલાસખાદિરાઃ સમિધઃ શુભાઃ ॥ ૧૦॥

અષ્ટોત્તરશતં વહ્નૌ જુહુયાદ્ વિધિપૂર્વકમ્ ।
અષ્ટવિંશતિસંખ્યા વા હોમં કુર્યાત્ પૃથક્ પૃથક્ ॥ ૧૧॥

મન્ત્રેણ ત્ર્યમ્બકેનાથ તિલાન્ વ્યાહૃતિભિસ્તથા ।
ગ્રહહોમં ચ વિધિવત્ કુર્યાદ્ ક્ષેમં તતો ભવેત્ ॥ ૧૨॥

અભિષેકં ચ જાતસ્ય તત્પિત્રોશ્ચાપિ મન્ત્રવિત્ ।

કુર્યાત્ તતો યથાશક્તિ બ્રાહ્મણાન્ ભોજયેત્ સુધીઃ ॥ ૧૩॥

---

## અથ ભર્દાવમદુર્યોગશાન્ત્યધ્યાયઃ ॥ ૮૮॥

અથાઽહં સમ્પ્રવક્ષ્યામિ ભદ્રાયામવમે તથા ।
વ્યાતૂપાતાદિદુર્યોગે યમઘણ્ટાદિકે ચ યત્ ॥ ૧॥

જન્માશુભફલં પ્રોક્તં તસ્ય શાન્તિવિધિં દ્વિજ ।
પ્રાપ્તે પ્રસૂતિદુર્યોગે શાન્તિં કુર્યાદ્ વિચક્ષણઃ ॥ ૨॥

દૈવજ્ઞૈર્દર્શિતે વાઽપિ સુલગ્ને સુદિને ગૃહી ।
પૂજનં દેવતાનાં ચ ગ્રહાણાં યજનં તથા ॥ ૩॥

શઙ્કરસ્યાઽભિષેકં ચ ઘૃતદીપં શિવાલયે ।
આયુર્વૃદ્ધિકરં કુર્યાદશ્વત્થસ્ય પ્રદક્ષિણમ્ ॥ ૪॥

હવનં વિષ્ણુમન્ત્રેણ સ/તમષ્ટોત્તરં સુધીઃ ।
બ્રાહ્મણાન્ ભોજયેત્ શક્ત્યા તતઃ કલ્યાણમાપ્નુયાત્ ॥ ૫॥

---

## અથૈક નક્ષત્ર જાતશાન્ત્યધ્યાયઃ ॥ ૮૯॥

અથ યદ્યેકનક્ષત્રે ભ્રાત્રોર્વા પિતૃપુત્રયોઃ ।
પ્રસૂતિશ્ચ તયોર્મૃતુરથૈવકસ્ય નિશ્ચયઃ ॥ ૧॥

તત્ર શાન્તિં પ્રવક્ષ્યામિ ગર્ગાદિમુનિભાષિતમ્ ।
સુદિને શુભનક્ષત્રે ચન્દ્રતારાબલાન્વિતે ॥ ૨॥

રિક્તાવવિષ્ટિવિવર્જ્યે ચ સમય શાન્તિમાચરેત્ ।
શનેરીશાનદિગ્ભાગે નક્ષત્રપ્રતિમાં શુભામ્ ॥ ૩॥

તન્નક્ષત્રોક્તમન્ત્રેણ પૂજયેત્ કલશોપરિ ।
રક્તવસ્ત્રેણ સંછાદ્ય વસ્ત્રયુગ્મેન વેષ્ટયેત્ ॥ ૪॥

સ્વસ્વશાખોક્તમાર્ગેણ કુર્યાદગ્નિમુખં તથા ।
પુનસ્તેનૈવ મન્ત્રેણ હુનદષ્ટોત્તરં શતમ્ ॥ ૫॥

પ્રત્યેકં સમિદન્નાજ્યૈઃ પ્રાયશ્ચિત્તાન્તમેવ હિ ।
અભિષેકં તતઃ કુર્યાદાચાર્યશ્ચ દ્વયોરપિ ॥ ૬॥

ઋત્વિગ્ભ્યો દક્ષિણાં દદ્યાદાચાર્યાય વિશેષતઃ ।
બ્રાહ્મણાન્ ભોજયેદ્ ભક્ત્યા વિત્તશાઠ્યવિવર્જિતઃ ॥ ૭॥

---

અથ સંક્રાન્તિજન્મશાન્ત્યધ્યાયઃ ॥ ૯૦॥

ઘોરાધ્વાંક્ષીમહોદર્યો મન્દા મન્દાકિની તથા ।
મિશ્રા ચ રાક્ષસી સૂર્યસંક્રાન્તિઃ સૂર્યવાસરાત્ ॥ ૧॥

સંક્રાન્તૌ ચ નરો જાતો ભવેદ્ દારિદ્ય દુઃખભાક્ ।
શાન્ત્યા સુખમવાપ્નોતિ તતઃ શાન્તિવિધિ બ્રુવે ॥ ૨॥

નવગ્રહમખં કુર્યાત્ તસ્ય દોષોપશાન્તયે ।
ગૃહસ્ય પૂર્વદિગ્ભાગે ગોમયેનોપલિપ્ય ચ ॥ ૩॥

સ્વલંકૃતપ્રદેશે તુ બ્રીહિરાશિં પ્રકલ્પયેત્ ।
પઞ્ચદ્રોણમિતં ધાન્યૈસ્તદર્ધં તણ્ડુલૈસ્તથા ॥ ૪॥

તદર્ધં ચ તિલૈઃ કુર્યાદ્રાશિં ચ દ્વિજસત્તમ ।
પૃથક્ ત્રિતયરાશૌ તુ લિખેદષ્ટદલં બુધૈઃ ॥ ૫॥

પુણ્યાહં વાચયિત્વા તુ આચાર્યં વૃણુયાત્ પુરા ।
ધર્મજ્ઞં મન્ત્રતત્ત્વજ્ઞં શાન્તિકર્મણિ કોવિદમ્ ॥ ૬॥

રાશિષુ સ્થાપયેત્ કુમ્ભાનવ્રણાન્ સુમનોહરાન્ ।
તીર્થોદકેન સમ્પૂર્ય સમૃદૌષધપલ્લવમ્ ॥ ૭॥

પંચગવ્યં ક્ષિપેત્તત્ર વસ્ત્રયુગ્મેન વેષ્ટયેત્ ।
કુમ્ભોપરિ ન્યસેત્ પાત્રં સૂક્ષ્મવસ્ત્રેણ વેષ્ટિતમ્ ॥ ૮॥

પ્રતિમાં સ્થાપયેત્ તત્ર સાધિપ્રત્યધિદૈવતામ્ ।
અધિદૈવં ભવેત્ સૂર્યશ્ચન્દ્રઃ પ્રત્યધિદૈવતમ્ ॥ ૯॥

ચન્દ્રાદિત્યાકૃતી પાર્શ્વે મધ્યે સંક્રાન્તિમર્ચયેત્ ।
પ્રતિમાં પૂજને પૂર્વં વસ્ત્રયુગ્મં નિવેદયેત્ ॥ ૧૦॥

તતો વ્યાહૃતિપૂર્વેવણ તત્તન્મન્ત્રેણ પૂજયેત્ ।
ત્રૈયમ્બકેણ મન્ત્રેણ પ્રધાનપ્રતિભાં પૂજયેત્ ॥ ૧૧॥

ઉત્સૂર્ય ઇતિ મન્ત્રેણ સૂર્યપૂજાં સમાચરેત્ ।
આપ્યાયસ્વેતિ મન્ત્રેણ ચન્દ્રપૂજાં સમાચરેત્ ॥ ૧૨॥

ઉપચારૈઃ ષોડશભિર્યદ્વા પઞ્ચોપચારકૈઃ ।
મૃત્યુંજયન મન્ત્રેણ પ્રધાનપ્રતિમાં સ્પૃશન્ ॥ ૧૩॥

અષ્ટોત્તરસહસ્રં ચાઽપ્યષ્ટોત્તરશતં જપેત્ ।
અથાઽષ્ટાવિંશતિં વાપિ જપેન્મન્ત્રં સ્વશક્તિતઃ ॥ ૧૪॥

કુમ્ભેભ્યઃ પશ્ચિમે દેશે સ્થણ્ડિલેઽગ્નિં પ્રકલ્પયેત્ ।
સ્વગૃહ્યોક્તવિધાનેન કારયેત્ સંસ્કૃતાનલમ્ ॥ ૧૫॥

ત્રયમ્બકેન મન્ત્રેણ સમિદાજ્યચરૂન્ હુનેત્ ।
અષ્ટોત્તરસહસ્રં વા અષ્ટોત્તરશતં યથા ॥ ૧૬॥

અષ્ટવિંશતિમેવાપિ કુર્યાદ્ હોમં સ્વશક્તિતઃ ।
મૃત્યુંજયેન મન્ત્રેણ તિલહોમશ્ચ કારયેત્ ॥ ૧૭॥

તતઃ સ્વિષ્ટકૃતં હુત્વાભિષેકં ચ કારયેત્ ।
બ્રહ્મણાન્ ભોજયેત્ પશ્ચાદેવં શાન્તિમવાપ્નુયાત્ ॥ ૧૮॥

---

Encoded and proofread by ajarve at fms30.cca.rockwell.com (Ahto Jarve)

---

*bRihatpArAsharahorAshAstramh 81-90*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*